अभ्यासपाठः २७

	पुल्लिङ्गशब्दाः	नपुंसकलिङ्गशब्दाः	स्त्रीलिङ्गशब्दाः
	चषकः	पात्रम्	स्थालिका
	चमसः	व्यण्जनम्	पाकशाला
	सूपः	तक्रम्	टिका
	कटः	लवणम्	छुरिका
	मन्त्रः	फेनकम्	मरीचिका
	सूचनारवः	आलुकम्	लेखनी
	दीपः	गृन्जनकम्	अङ्कनी
	स्यूतः	मूलकम्	घटी
	श्लोकः	भोजनम्	कर्तरी
	ग्रन्थः	मित्रम्	सम्मार्जनी

प्रयोगपरिवर्तनं कुर्वन्तु ।

१ सः चषकं प्रक्षालयति ।
२ एषा पात्रम् आनयति ।
३ रणवीरः स्थालिकां स्थापयति ।
४ भगिनी पेटिकाम् उद्घाटयति ।
५ सा व्यञ्जनं खादति ।
६ अहं भोजनं करोमि ।
७ रामानन्दः चमसान् स्वीकरोति ।
८ उमा दीपान् ज्वालयति ।
९ प्रसादः मरीचिकाः खादति ।
१० सरोजा स्यूतान् वहति ।
११ परिवेषकः पाकशालां गच्छति ।
१२ विनायकः फेनकानि आनयति ।
१३ चोरः छुरिकां गृह्णाति ।
१४ अनन्तः सूचनारवं करोति ।
१५ आचार्यः मरीचिकां खादति ।
१६ चोरः लेखनीं चोरयति ।
१७ नम्रता गृञ्जनकम् इच्छति ।
१८ मङ्गला अङ्कनीं नयति ।
१९ शान्तला मूलकं जिघ्रति ।
२० पाचकाः सूपं कुर्वन्ति ।
२१ अहं मित्राणि पश्यामि ।
२२ ते सम्मार्जनीं नयन्ति ।
२३ राजीवः लवणं त्यजति ।
२४ श्रीमति कर्तरीं स्वीकरोति ।
२५ गीता भोजनं न करोति ।
२६ पन्नलालः सूपं परिवेषयति ।
२७ सर्वे स्थालिकाः आनयन्ति ।
२८ टीकारामः घटीं विस्मरति ।
२९ अनिता आलुकं न खादति ।

३० सा चमसम् आनयति ।
३१ का मन्त्रं न वदति ?
३२ भवान् चषकान् ददाति ।
३३ सः कटं सम्यक् करोति ।
३४ भवती छुरिकाः अन्तः स्थापयति ।
३५ कः तक्रम् इच्छति ?
३६ एषः लेखनीः क्रीणाति ।
३७ अहं पत्राणि प्रक्षालयामि ।
३८ कविः श्लोकान् लिखति ।
३९ छात्राः ग्रन्थान् नयन्ति ।
४० बालकृष्णः पेटिकाः प्रेषयति ।

Encoded by Sarada Susarla
Send corrections to sanskrit@cheerful.com